# Bhishmaproktam 3 Shri Krishna Stotram

# ભીષ્મપ્રોક્તં ૩ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Bhishmaproktam 3 Shri Krishna Stotram

File name : bhIShmaproktaM3shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | anuparva | adhyAya 151/3-51||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# ભીષ્મપ્રોક્તં ૩ શ્રીકૃષ્ણસ્તોત્રમ્

ભીષ્મ ઉવાચ ।
અયં દૈવતવંશો વૈ ઋષિવંશસમન્વિતઃ ।
દ્વિસન્ધ્યં પઠિતઃ પુત્ર કલ્મષાપહરઃ પરઃ ॥ ૨॥

દેવાસુરગુરુર્દેવઃ સર્વભૂતનમસ્કૃતઃ ।
અચિન્ત્યોઽથાપ્યનિર્દેશ્યઃ સર્વપ્રાણો હ્યયોનિજઃ ॥ ૩॥

પિતામહો જગન્નાથઃ સાવિત્રી બ્રહ્મણઃ સતી ।
વેદભૂરથ કર્તા ચ વિષ્ણુર્નારાયણઃ પ્રભુઃ ॥ ૪॥

ઉમાપતિર્વિરૂપાક્ષઃ સ્કન્દઃ સેનાપતિસ્તથા ।
વિશાખો હુતભુગ્વાયુશ્ચન્દ્રાદિત્યૌ પ્રભાકરૌ ॥ ૫॥

શક્રઃ શચીપતિર્દેવો યમો ધૂમોર્ણયા સહ ।
વરુણઃ સહ ગૌર્યા ચ સહ ઋદ્ધ્યા ધનેશ્વરઃ ॥ ૬॥

સૌમ્યા ગૌઃ સુરભિર્દેવી વિશ્રવાશ્ચ મહાનૃષિઃ ।
ષટ્કાલઃ સાગરો ગઙ્ગા સ્રવન્ત્યોઽથ મરુદ્ગણાઃ ॥ ૭॥

વાલખિલ્યાસ્તપઃસિદ્ધાઃ કૃષ્ણદ્વૈપાયનસ્તથા ।
નારદઃ પર્વતશ્ચૈવ વિશ્વાવસુર્હહાહુહૂઃ ॥ ૮॥

તુમ્બરુશ્ચિત્રસેનશ્ચ દેવદૂતશ્ચ વિશ્રુતઃ ।
દેવકન્યા મહાભાગા દિવ્યાશ્ચાપ્સરસાં ગણાઃ ॥ ૯॥

ઉર્વશી મેનકા રમ્ભા મિશ્રકેશી અલમ્બુષા ।
વિશ્વાચી ચ ઘૃતાચી ચ પઞ્ચચૂડા તિલોત્તમા ॥ ૧૦॥

આદિત્યા વસવો રુદ્રાઃ સાશ્વિનઃ પિતરોઽપિ ચ ।
ધર્મઃ સત્યં તપો દીક્ષા વ્યવસાયઃ પિતામહઃ ॥ ૧૧॥

શર્વર્યો દિવસાશ્ચૈવ મારીચઃ કશ્યપસ્તથા ।

શુક્રો બૃહસ્પતિર્ભૌમો બુધો રાહુઃ શનૈશ્ચરઃ ॥ ૧૨॥

નક્ષત્રાણ્યૃતવશ્ચૈવ માસાઃ સન્ધ્યાઃ સવત્સરાઃ ।
વૈનતેયાઃ સમુદ્રાશ્ચ કદ્રુજાઃ પન્નગાસ્તથા ॥ ૧૩॥

શતદ્રૂશ્ચ વિપાશા ચ ચન્દ્રભાગા સરસ્વતી ।
સિન્ધુશ્ચ દેવિકા ચૈવ પુષ્કરં તીર્થમેવ ચ ॥ ૧૪॥

ગઙ્ગા મહાનદી ચૈવ કપિલા નર્મદા તથા ।
કમ્પુના ચ વિશલ્યા ચ કરતોયામ્બુવાહિની ॥ ૧૫॥

સરયૂર્ગણ્ડકી ચૈવ લોહિત્યશ્ચ મહાનદઃ ।
તામ્રારુણા વેત્રવતી પર્ણાશા ગૌતમી તથા ॥ ૧૬॥

ગોદાવરી ચ વેણા ચ કૃષ્ણવેણા તથાદ્રિજા ।
દૃષદ્વતી ચ કાવેરી વઙ્ક્ષુર્મન્દાકિની તથા ॥ ૧૭॥

પ્રયાગં ચ પ્રભાસં ચ પુણ્યં નૈમિષમેવ ચ ।
તચ્ચ વિશ્વેશ્વરસ્થાનં યત્ર તદ્વિમલં સરઃ ॥ ૧૮॥

પુણ્યતીર્થૈશ્ચ કલિલં કુરુક્ષેત્રં પ્રકીર્તિતમ્ ।
સિન્ધૂત્તમં તપોદાનં જમ્બૂમાર્ગમથાપિ ચ ॥ ૧૯॥

હિરણ્વતી વિતસ્તા ચ તથૈવેક્ષુમતી નદી ।
વેદસ્મૃતિર્વેદસિની મલવાસાશ્ચ નદ્યપિ ॥ ૨૦॥

ભૂમિભાગાસ્તથા પુણ્યા ગઙ્ગાદ્વારમથાપિ ચ ।
ઋષિકુલ્યાસ્તથા મેધ્યા નદી ચિત્રપથા તથા ॥ ૨૧॥

કૌશિકી યમુના સીતા તથા ચર્મણ્વતી નદી ।
નદી ભીમરથી ચૈવ બાહુદા ચ મહાનદી ॥ ૨૨॥

મહેન્દ્રવાણી ત્રિદિવા નીલિકા ચ સરસ્વતી ॥ ૨૨॥

નન્દા ચાપરનન્દા ચ તથા તીર્થં મહાહ્રદમ્ ।
ગયાથ ફલ્ગુતીર્થં ચ ધર્મારણ્યં સુરૈર્વૃતમ્ ॥ ૨૩॥

તથા દેવનદી પુણ્યા સરશ્ચ બ્રહ્મનિર્મિતમ્ ।
પુણ્યં ત્રિલોકવિખ્યાતં સર્વપાપહરં શિવમ્ ॥ ૨૪॥

હિમવાન્પર્વતશ્ચૈવ દિવ્યૌષધિસમન્વિતઃ ।

વિન્ધ્યો ધાતુવિચિત્રાઙ્ગસ્તીર્થવાનૌષધાન્વિતઃ ॥ ૨૫॥

મેરુર્મહેન્દ્રો મલયઃ શ્વેતશ્ચ રજતાચિતઃ ।
શ‍ૃઙ્ગવાન્મન્દરો નીલો નિષધો દર્દુરસ્તથા ॥ ૨૬॥

ચિત્રકૂટોઽઞ્જનાભશ્ચ પર્વતો ગન્ધમાદનઃ ।
પુણ્યઃ સોમગિરિશ્ચૈવ તથૈવાન્યે મહીધરાઃ ॥ ૨૭॥

દિશશ્ચ વિદિશશ્ચૈવ ક્ષિતિઃ સર્વે મહીરુહાઃ ॥ ૨૭॥

વિશ્વેદેવા નભશ્ચૈવ નક્ષત્રાણિ ગ્રહાસ્તથા ।
પાન્તુ વઃ સતતં દેવાઃ કીર્તિતાકીર્તિતા મયા ॥ ૨૮॥

કીર્તયાનો નરો હ્યેતાન્મુચ્યતે સર્વકિલ્બિષૈઃ ।
સ્તુવંશ્ચ પ્રતિનન્દંશ્ચ મુચ્યતે સર્વતો ભયાત્ ।
સર્વસઙ્કરપાપેભ્યો દેવતાસ્તવનન્દકઃ ॥ ૨૯॥

દેવતાનન્તરં વિપ્રાંસ્તપઃસિદ્ધાંસ્તપોધિકાન્ ।
કીર્તિતાન્કીર્તયિષ્યામિ સર્વપાપપ્રમોચનાન્ ॥ ૩૦॥

યવક્રીતોઽથ રૈભ્યશ્ચ કક્ષીવાનૌશિજસ્તથા ।
ભૃગ્વઙ્ગિરાસ્તથા કણ્વો મેધાતિથિરથ પ્રભુઃ ।
બર્હી ચ ગુણસમ્પન્નઃ પ્રાચીં દિશમુપાશ્રિતાઃ ॥ ૩૧॥

ભદ્રાં દિશં મહાભાગા ઉલ્મુચુઃ પ્રમુચુસ્તથા ।
મુમુચુશ્ચ મહાભાગઃ સ્વસ્ત્યાત્રેયશ્ચ વીર્યવાન્ ॥ ૩૨॥

મિત્રાવરુણયોઃ પુત્રસ્તથાગસ્ત્યઃ પ્રતાપવાન્ ।
દૃઢાયુશ્ચોર્ધ્વબાહુશ્ચ વિશ્રુતાવૃષિસત્તમૌ ॥ ૩૩॥

પશ્ચિમાં દિશમાશ્રિત્ય ય એધન્તે નિબોધ તાન્ ।
ઉષઙ્ગુઃ સહ સોદર્યૈઃ પરિવ્યાધશ્ચ વીર્યવાન્ ॥ ૩૪॥

ઋષિર્દીર્ઘતમાશ્ચૈવ ગૌતમઃ કશ્યપસ્તથા ।
એકતશ્ચ દ્વિતશ્ચૈવ ત્રિતશ્ચૈવ મહર્ષયઃ ।
અત્રેઃ પુત્રશ્ચ ધર્માત્મા તથા સારસ્વતઃ પ્રભુઃ ॥ ૩૫॥

ઉત્તરાં દિશમાશ્રિત્ય ય એધન્તે નિબોધ તાન્ ।
અત્રિર્વસિષ્ઠઃ શક્તિશ્ચ પારાશર્યશ્ચ વીર્યવાન્ ॥ ૩૬॥

વિશ્વામિત્રો ભરદ્વાજો જમદગ્નિસ્તથૈવ ચ ।

ઋચીકપૌત્રો રામશ્ચ ઋષિરૌદ્દાલકિસ્તથા ॥ ૩૭॥

શ્વેતકેતુઃ કોહલશ્ચ વિપુલો દેવલસ્તથા ।
દેવશર્મા ચ ધૌમ્યશ્ચ હસ્તિકાશ્યપ એવ ચ ॥ ૩૮॥

લોમશો નાચિકેતશ્ચ લોમહર્ષણ એવ ચ ।
ઋષિરુગ્રશ્રવાશ્ચૈવ ભાર્ગવશ્ચ્યવનસ્તથા ॥ ૩૯॥

એષ વૈ સમવાયસ્તે ઋષિદેવસમન્વિતઃ ।
આદ્યઃ પ્રકીર્તિતો રાજન્સર્વપાપપ્રમોચનઃ ॥ ૪૦॥

નૃગો યયાતિર્નહુષો યદુઃ પૂરુશ્ચ વીર્યવાન્ ।
ધુન્ધુમારો દિલીપશ્ચ સગરશ્ચ પ્રતાપવાન્ ॥ ૪૧॥

કૃશાશ્વો યૌવનાશ્વશ્ચ ચિત્રાશ્વઃ સત્યવાંસ્તથા ।
દુઃષન્તો ભરતશ્ચૈવ ચક્રવર્તી મહાયશાઃ ॥ ૪૨॥

યવનો જનકશ્ચૈવ તથા દૃઢરથો નૃપઃ ।
રઘુર્નરવરશ્ચૈવ તથા દશરથો નૃપઃ ॥ ૪૩॥

રામો રાક્ષસહા વીરઃ શશબિન્દુર્ભગીરથઃ ।
હરિશ્ચન્દ્રો મરુત્તશ્ચ જહ્નુર્જાહ્નવિસેવિતા ॥ ૪૪॥

મહોદયો હ્યલર્કશ્ચ ઐલશ્ચૈવ નરાધિપઃ ।
કરન્ધમો નરશ્રેષ્ઠઃ કધ્મોરશ્ચ નરાધિપઃ ॥ ૪૫॥

દક્ષોઽમ્બરીષઃ કુકુરો રવતશ્ચ મહાયશાઃ ।
મુચુકુન્દશ્ચ રાજર્ષિર્મિત્રભાનુઃ પ્રિયઙ્કરઃ ॥ ૪૬॥

ત્રસદસ્યુસ્તથા રાજા શ્વેતો રાજર્ષિસત્તમઃ ।
મહાભિષશ્ચ વિખ્યાતો નિમિરાજસ્તથાષ્ટકઃ ॥ ૪૭॥

આયુઃ ક્ષુપશ્ચ રાજર્ષિઃ કક્ષેયુશ્ચ નરાધિપઃ ।
શિબિરૌશીનરશ્ચૈવ ગયશ્ચૈવ નરાધિપઃ ॥ ૪૮॥

પ્રતર્દનો દિવોદાસઃ સૌદાસઃ કોસલેશ્વરઃ ।
ઐલો નલશ્ચ રાજર્ષિર્મનુશ્ચૈવ પ્રજાપતિઃ ॥ ૪૯॥

હવિધ્રશ્ચ પૃષધ્રશ્ચ પ્રતીપઃ શન્તનુસ્તથા ।
કક્ષસેનશ્ચ રાજર્ષિર્યે ચાન્યે નાનુકીર્તિતાઃ ॥ ૫૦॥

મા વિઘ્નં મા ચ મે પાપં મા ચ મે પરિપન્થિનઃ ।
ધ્રુવો જયો મે નિત્યં સ્યાત્પરત્ર ચ પરા ગતિઃ ॥ ૫૧॥

ઇતિ મહાભારતે અનુશાસનપર્વણિ ૧૫૧ અધ્યાયાન્તર્ગતં
ભીષ્મપ્રોક્તં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । અનુપર્વ । અધ્યાય ૧૫૧/૩-૫૧॥

mahAbhArata . anuparva . adhyAya 151/3-51..

Proofread by PSA Easwaran

---

*Bhishmaproktam 3 Shri Krishna Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*